श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री स्कान्धे महापुराणे प्रभासखण्डे

# ॥ श्री आदिनारायणस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री आदिनारायणस्तवः ॥

ऋषय ऊचुः

नमः परमकल्याण कल्याणायात्मयोगिने।
जनार्दनायदेवाय श्रीधरायसुवेधसे ॥ 1 ॥

नमः परमकिञ्जल्क सुवर्णमुकुटाय च।
केशवायातिसूक्ष्माय बृहन्मूर्त्ते नमोनमः ॥ 2 ॥

नमः पङ्कजनाभाय हरयेहरिवेधसे।
नमोहिरण्यगर्भाय जगतः कारणात्मने ॥ 3 ॥

अच्युतायनमोनित्यमुन्नताय नमोनमः।
नमो मायापटच्छन्न जगद्धात्रेमहात्मने ॥ 4 ॥

संसारसागरोत्तार ज्ञानपोतप्रदायिने।
अकुण्ठमतयेधात्रे सर्गस्थित्यन्तकारिणे ॥ 5 ॥

यथाहिवासुदेवेति प्रोक्तंपातकनाशनम्।
तथाविलयमभ्येतु दैत्योयंमेघवाहनः ॥ 6 ॥

यथानविष्णुभक्तेषु पापंनाप्नोतिसंस्थितम्।
तथाविनाशमायातु दैत्योयंपापकर्मकृत् ॥ 7 ॥

स्मृतमात्रोयथाविष्णुस्सर्वंपापंव्यपोहति।
तथाप्रणाशमभ्येतु दैत्योयंमेघवाहनः ॥ 8 ॥

भवन्तुभद्राणिसमस्तदोषाः
प्रयान्तुनाशंजगतोऽखिलस्य।
अभ्येत्यभक्त्यापरमेश्वरस्य
स्मृते जगद्धातरिवासुदेवे॥ **9** ॥

यस्तंपूजयतेभक्त्या एकादश्यान्नरोत्तमः।
सोऽश्वमेधफलंप्राप्य मोदतेदिविदेववत्॥ **10** ॥

गोलक्षंब्राह्मणेदत्त्वा यत्फलंप्राप्नुयान्नरः।
तदादिदेवं गोविन्दं दृष्ट्वाभक्त्याफलंलभेत्॥ **11** ॥

कलौकृतयुगस्तेषां क्लेशास्तेषांसुखाधिकाः।
आदिनारायणोदेवो येषांहृदयसंस्थितः॥ **12** ॥

एकादश्यांरविदिने स्नात्वासन्निहितोजले।
आदिनारायणंपूज्य मुच्यतेभवबन्धनात्॥ **13** ॥

॥ श्री आदिनारायणस्तवः समाप्तः॥